# vishveshvaranIrAjanam

# વિશ્વેશ્વરનીરાજનમ્

## Document Information

Text title : vishveshvaranIrAjanam

File name : vishveshvaranIrAjanam.itx

Category : AratI, shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : January 19, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# વિશ્વેશ્વરનીરાજનમ્

શ્રીગણેશાય નમઃ ।

સત્યં જ્ઞાનં શુદ્ધં પૂર્ણં હૃદિ ભાતં
    વન્દે શમ્ભું શાન્તં માયાગુણરહિતમ્ ।
સાક્ષિરૂપં તત્ત્વં વિદ્વદ્ભિર્ગમ્યં
    વેદૈર્જ્ઞેયં નિત્યં ગુરુભક્તૈર્વેદ્યમ્ ।
        ૐ હર હર હર મહાદેવ ॥ ૧॥

દેવાન્ ભીતાન્ દૃષ્ટ્વા યઃ કૃપયાવિષ્ટો
    વિષપાનમપિ કૃત્વાઽસિતકઠો જાતઃ ।
ત્રિપુરં બિભિદે યુદ્ધે દુર્ભેદ્યં સર્વૈસ્તં
    વન્દે સર્વેશં દેવૈર્હૃદિ ધ્યાતમ્ ।
        ૐ હર હર હર મહાદેવ ॥ ૨॥

વિઘ્નવિનાશનકર્તા ભવતાં યસ્તાતઃ
    પૂજ્યો નિખિલૈર્દેવૈર્દુરિતં હરતુ નઃ ।
સ્કન્દઃ પુત્રો બલવાન્ તારકાસુરહન્તા
    સ્વમાત્રે વરદાતા બ્રહ્મચર્યં ધર્તા ।
        ૐ હર હર હર મહાદેવ ॥ ૩॥

દશમુખબાણપ્રભૃતયો ભક્તાસ્તે જાતાઃ
    નાહં વક્તું શક્તઃ પરિગણનં કૃત્વા ।
યે દેવાનામૈશ્વર્યં સ્વાધીનં ચક્રુઃ
    તેષાં ચિત્રં વીર્યં તવ કૃપયા જાતમ્ ।
        ૐ હર હર હર મહાદેવ ॥ ૪॥

પૂજાં કર્તું વિષ્ણુર્નેત્રં ત્વયિ સમર્પ્ય
    રાજ્યં કુરુતે જગતાં ત્રયાણાં તવ દૃષ્ટ્યા ।
યતીનાં હૃદયે સ્થિત્વા કામં નાશયિતા

ગઙ્ગાધર શિવ શઙ્કર ગિરિજાધીશસ્ત્વમ્ ।
ૐ હર હર હર મહાદેવ ॥ ૫॥

સંહર્તૃ શિવરૂપમુગ્રં તવ ધ્યાત્વા
ભીતા દેવાઃ સર્વે ભક્તિં ત્વયિ ચક્રુઃ ।
દુઃખં દૃષ્ટ્વા જગતિ શરણં ત્વાં યામો
દેવાનામપિ દેવં મહાદેવં પ્રણુમઃ ।
ૐ હર હર હર મહાદેવ ॥ ૬॥

ત્યક્ત્વા ધર્મં બ્રહ્મા દુહિતર્યાસક્તઃ
દણ્ડં પ્રાપ્તસ્ત્વત્તઃ પન્થાનં નીતઃ ।
વિદ્યોપદેષ્ટુસ્ત્વત્તઃ સનકાદ્યા ભક્તાઃ
ઉપદેશં શ‍ૃણ્વન્તિ વૈરાગ્યે સક્તાઃ ।
ૐ હર હર હર મહાદેવ ॥ ૭॥

પ્રાણાન્તે વૈ કાશ્યાં મુક્તિં સર્વેભ્યો
વેદપુરાણૈઃ કથિતાં દદતે નિત્યં યઃ ।
સર્વજ્ઞં તમનાદિં સ્તૌતિ યો ભક્ત્યા
અર્થં કામં ધર્મં મોક્ષં લભતે સઃ ।
ૐ હર હર હર મહાદેવ ॥ ૮॥

ઇત્યચ્યુતાનન્દગિરિવિરચિતં વિશ્વેશ્વરનીરાજનં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*vishveshvaranIrAjanam*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*